# M.A. 3rd Semester Examination, 2022

## SANSKRIT

PAPER – SAN-302

*Full Marks* : 40

*Time* : 2 hours

*The figures in the right hand margin indicate marks*

*Candidates are required to give their answers in their own words as far as practicable*

सर्वे प्रश्नाः संस्कृतेनैव समाधेयाः (देवनागर्य्या)

**'क'–विभागः**

**1.** प्रश्नद्वयं समाधेयम् — 2×2

(क) काव्यप्रकाशशब्दस्य कोऽर्थः ?

(ख) 'काव्यप्रकाशः'– केन विरचितः ? अस्य ग्रन्थस्य कयोश्चिद् द्वयोः टीकयोः नाम लिख्यताम् ।

(*ग*) मम्मटमते काव्यस्य प्रयोजनानि कानि ?

2. कयोश्चिद् द्वयोः व्याख्या कार्या— 4 × 2

(*क*) संकेतितश्चतुर्भेदः जात्यादिर्जातिरेव वा

(*ख*) अतादृशि गुणीभूतव्यङ्ग्यं व्यङ्ग्ये तु मध्यमम् ।

(*ग*) तात्पर्यार्थोऽपि केषुचित् ।

3. एकः प्रश्नः समाधेयः— 8 × 1

(*क*) प्रतिपदव्यावृत्तिपुरःसरं मम्मटाभिमतं काव्यलक्षणं निरूप्यताम् ।

(*ख*) मम्मटमते काव्ये के हेतवः ? "इति हेतुस्तदुद्भवे"—इत्यत्र हेतुशब्दे एकवचनं किमर्थम् ?

## 'ख'–विभागः

4. प्रश्नद्वयं समाधेयम्— 2 × 2

(*क*) वक्रोक्तिः कतिधा ? तत्र काकुशब्दस्य कोऽर्थः ?

(*ख*) शब्दालंकारार्थालंकारयोः मुख्यः भेदः कः ?

(ग) किं नाम उपमेयम् ? किं च उपमानम् ?

5. अधस्तनानामेकस्य सलक्षणं सोदाहरणं स्वरूपं निरूपणीयम्— 4 × 1

(क) यमक:

(ख) उत्प्रेक्षा

(ग) रूपकम्

6. एकस्य सयुक्ति अलंकार: निर्णय: 4 × 1

(क) क्व सूर्यप्रभवो वंश: क्व चाल्पविषया मति: ।
तितिर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम् ।।

(ख) अवाप्त: प्रागल्भ्यं परिणतरुच: शैलतनये
कलङ्को नैवायं विलसति शशाङ्कस्य वपुषि ।
अमुष्येयं मन्ये बिगलदमृतस्यन्दशिशिरे
रतिश्रान्ता शेते रजनिरमणी गाढमुरसि ।।

7. एक: प्रश्न: समाधेय: — 8 × 1

(क) अनुप्रासस्य सामान्यलक्षणं निरूप्य तद्भेदानामपि स्वरूपं सलक्षणं सोदाहरणं निरुप्यताम् ।

(*ख*) सलक्षणं सोदाहरणम् सभेदं च तुल्ययोगितायाः स्वरूपमा-
लोच्यताम् ।

---